आदर्शउत्तरपत्रम् विषयकोड1010SET-Aपूर्वमध्यमा-द्वितीयखण्ड: 2026 षष्ठम्-प्रश्नपत्रम् दर्शनम्

*1- यथोचितं विकल्पम् - (1×4=4)*

*क-(ब) मोक्षः ख-(अ) अत्यन्ताभावस्य ग-(ब) अनुमितिः घ-(स)श्रीचन्द्रसिंहः*

*2-रिक्तस्थानानि- (1×4=4)*

*1 कर्म 2 भावना 3 जीवस्य 4 तर्कः*

*3-उचितमेलनम् उत्तराणि -(1×4=4)*

*1-(ii)विपर्ययः (2-(i)वैदिकवाक्यम् 3-(iv)आप्तः 4-(iii)योग्यता*

*4-सत्यम्/असत्यम्- (1×4=4)*

*1 असत्यम् 2 सत्यम् 3 असत्यम् 4 सत्यम्*

*5-एकपदेन-उत्तराणि-(1×4=4)*

*1.द्विविधम् 2. सपक्षः 3. त्रिविधम् 4.श्रीमदन्नम्भट्टः*

*अतिलघूत्तरीयप्रश्नानाम् उत्तराणि*

6-साध्यम्-व्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः| 02

7-मिथ्येति-यथार्थज्ञानवारणाय "मिथ्या" इति अयथार्थवारणाय "ज्ञान" इति | 02

8- नित्यद्रव्यवृत्तयो व्यावर्तका विशेष | 02

9- आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति | 02

10-पदानामविलम्बेनोच्चारणं सन्निधि | 02

11-क्रोधो इति द्वेष्टि इत्यनुभवसिध्दद्वेषत्व जातिमान् द्विष्टसाधनाताज्ञानजन्यगुणो वा द्वेषः| 02

12 - संशयस्य उदहरणम् ----02

(पदकृ०) अयथार्थानुभवं विभजते—अयथार्थ इति। संशयं लक्षयति एकेति ॥ एकस्मिन्धर्मिण्येकस्मिन्पुरोवर्तिनि पदार्थे विरुद्धा व्यधिकरणा नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यं सम्बन्धः, तदवगाहि ज्ञानं संशयः, इत्यर्थः ॥ घटपटौ इति समूहालम्बनज्ञानस्य घटत्वपटत्व

P.T.O.

प्रश्न 13 उत्तर → व्याप्तिविशिष्टेति ॥ विषयिता (१) सम्बन्धेन व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः इत्यर्थः। घटादिज्ञानवारणाय पक्षधर्मता इति। 'धूमवान् पर्वतः' इति ज्ञानवारणाय 'व्याप्ति-विशिष्ट' इति ॥ तदिति ॥ परामर्शजन्यम् इत्यर्थः।

अथवा

'ननु ज्ञातेयं व्याप्तिः' पक्षधर्मताज्ञानम् इत्यत्र का नाम पक्षधर्मता इत्यपेक्षमाणं वृत्तिं तत्स्वरूपं निरूपयति - व्याप्यस्येति व्याप्यो नाम व्याप्त्याश्रयः स च धूमादिरेव तस्य पर्वतादिवृत्तित्वं पक्षधर्मता इत्यर्थः।

प्र० 14 उत्तर - उपमितेः करणमुपमानमित्यर्थः। तथाहि- कश्चिद् गवयपदार्थमजानन् कुतश्चिद् आरण्यक पुरुषाद् 'गोसादृशो गवयः' इति श्रुत्वा वनं गतो वाक्यार्थस्मरन् गोसादृशं पिण्डं पश्यति तदनन्तरं गवयशब्दोवाच्योऽयम् इत्युपमितिरुत्पद्यते।

अथवा

वाक्यं लक्षयति वाक्यमिति। घटादिवारणाय पद (समूह) इति। शक्तमिति निरूपकतासम्बन्धेन शक्तिविशिष्टम् इत्यर्थः।

———XXXXX———

P.T.O.

प्रश्न-15) उत्तर- प्रागभावं लक्षयति - अनादिरिति ॥ घटादि वारणाय प्रथमदलम् । परमाणुवारणाय द्वितीयदलम् ॥ पुनः प्रागभावः कस्मिन् कालेऽस्ति' इत्यत आह - उत्पत्तेरिति । कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगि समवायिकारणे वर्तते. इत्यर्थः ।

अथवा

ध्वंसं लक्षयति - सादिरिति । घटादिवारणाय 'अनन्त' इति । आत्मादिवारणाय 'आदि' इति ॥ उत्पत्तीति कार्यस्योत्पत्यनन्तरं स्वप्रतियोगि समवायिकारणवृत्तिरित्यर्थः, स च ध्वस्त इति प्रत्ययविषयः ।

प्रश्न 16) उत्तर- प्रयत्नं निरूपयति कृतिरिति ॥ प्रयत्नत्वजातिमान् प्रयत्नः । स त्रिविधः प्रवृत्ति निवृत्ति जीवन योनि-भेदात । इच्छा जन्यो गुणः प्रवृत्तिः । द्वेषजन्यो गुणो निवृत्तिः । जीवनादृष्टजन्यो गुणो जीवन-योनिः । स च प्राणसंचारकारणम् ॥

अथवा

अनुभवेति आत्मादिवारणाय प्रथमदलम् अनुभवध्वंसवारणाय द्वितीयदलम् । अनुभवजन्या स्मृतिहेतुर्भावना - आत्ममात्र वृत्तिः ।

प्रश्न 17) नित्यमिति संयोगादिवारणाय 'नित्यम्' इति कालादिपरिमाणवारणाय 'अनेक' इति · अनेकानुगतत्वं च समवायेन बोध्यम् तेन नात्यन्ताभावेऽतिव्याप्तिः ॥

XX XXXX XX

P.T.O.

अथवा नित्यद्रव्यवृत्तय इति घटत्वादिवारणाय 'नित्यद्रव्यवृत्तयः' इति। आत्मत्वमनस्त्ववारणाय आत्मत्वमनस्त्वभिन्नत्वे सति इत्यपि बोद्ध्यम्।

दीर्घ - उत्तरीय प्रश्न - उत्तराणि

प्रश्न 18। उत्तर →

स्वार्थमिति - स्वस्यार्थः प्रयोजनं यस्मात्तत्स्वार्थमिति समासः। स्वप्रयोजनं च स्वस्यानुमेयप्रतिपत्तिः। एवं परार्थम् इत्यस्यपि। अयमिति। व्याप्तिबलेन लीनमर्थं गमयति इति लिङ्गम्। तच्च धूमादिः तस्य परामर्शो ज्ञानविशेष इत्यर्थः। तस्मादिति ॥ लिङ्गपरामर्शादित्यर्थः। स्वार्थमुपसंहरति तदेतदिति। यस्मादिदं स्वप्रतिपत्तिहेतुः तस्मादेतत्स्वार्थानुमानमित्यर्थः।

अथवा

यत् पञ्चावयववाक्यं प्रयुज्यते, तत् परार्थानुमानम्' इति सम्बन्धः। अवयवत्वं नाम द्रव्यसमवायिकारणत्वम् प्रतिज्ञादिषु तदसम्भवात्कथमेतेऽवयवाः स्युः। इति चेत। नन्वेवमपि पञ्चावयववाक्यस्यानुमानत्वमेव न विचारसहम्। तस्य लिङ्गपरामर्शत्वाभावात्।

————— XXXXXXXXXXX —————

P.T.O.

प्र॰19 → सत्प्रतिपक्षं लक्षयति- साध्येति - यस्य हेतोः साध्याभावकसाधकं। साध्याभावस्यानुमापकं हेत्वंतरं प्रतिपक्षो हेतुर्विद्यते स हेतुः सत्प्रतिपक्षः इत्यर्थः।
अयमेव। प्रकरणसमः इत्युच्यते। विरुद्धवारणाय हेत्वन्तरं यस्य इति। बाह्यादिवारणाय साध्याभाव इति।

अथवा

(ग) आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्पक्षकत्वम्) भवति हि अरविन्दे गगनीयत्वरूपपक्षतावच्छेदकाभाववत्वम् अरविन्दरूपपक्षे गगनीयत्व विरहात्। ननु कथमरविन्दे गगनीयत्व विरहोऽत आह:- अत्रेति।

(घ) सत्प्रतिपक्षं लक्षयति साध्येति। यस्य हेतोः साध्याभावकसाधकं। साध्याभावस्यानुमापकं हेत्वंतरं प्रतिपक्षो हेतुर्विद्यते, स हेतुः सत्प्रतिपक्षः इत्यर्थः। अयमेव प्रकरणसमः इत्युच्यते। विरुद्धवारणाय हेत्वन्तरं यस्य इति। बाध्यादिवारणाय साध्याभाव इति।

(ङ) विरुद्धं लक्षयति साध्येति। सद्धेतुवारणाय 'साध्याभावव्याप्तः' इति। सत्प्रतिपक्षवारणाय सत्प्रतिपक्षभिन्नः इत्यपि ज्ञेयम्। कृतेति कार्यत्वादित्यर्थः कृतकत्वादिति।

———××××××××———

P.T.O.

प्र०२०) नित्यमिति संयोगादिवारणाय (नित्यम्) इति
कालादिपरिमाणवारणाय अनेक इति
अनेकानुगतत्वं च समवायेन बोध्यम्। तेन
नात्यन्ताभावेऽतिव्याप्तिः।

अथवा

चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्।
अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसन्नि-
कृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्ट-
संयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।

प्रश्नः21) उत्तरम् → अन्योन्याभावं लक्षयति - तादात्म्येति।
प्रागभावप्रध्वंसाभाववारणाय विशेषणं
घटाभाववानिति प्रतीतिविषय घटादिवारणाय
विशेष्यम्।

अथवा

ध्वंसं लक्षयति - सादिरिति। घटादिवारणाय
'अनन्त' इति। आत्मादिवारणाय 'सादि'
इति। उत्पन्नेति। 'कार्यस्योत्पत्त्यनन्तरं
स्वप्रतियोगिसमवायिकारणावृत्तिरित्यर्थः,
स च 'ध्वस्त' इति प्रत्ययविषयः।

——— ×××××× ———

P.T.O.

प्र॰ 22) केवलव्यतिरेकिणो लक्षणमाह - व्यतिरेकेति।
व्यतिरेकेणैव व्याप्तिर्यस्मिंस्तत्तथा। अन्वयव्य-
तिरेकिण्यतिव्याप्तिवारणाय मात्रपदम्
नचेयं तथेति। इयं पृथिवी न तथा गन्धाभाववती
इत्यर्थः। तस्मान्न तथेति। गन्धाभाववत्त्वा-
भावादितरभेदाभाववती न, इत्यर्थः। ननु
अत्र किमिति नान्वयव्याप्तिः इत्याशंक्य
परिहरति अत्रेति। 'इतरभेदसाध्यकानुमाने'
इत्यर्थः इदमुपलक्षणम् "जीवच्छरीरं सात्मकं"
प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घटः
प्रत्यक्षादिकं 'प्रमाणम्' इति व्यवहर्तव्यम्
प्रमाकरणत्वात् यन्नैवं तन्नैवं यथा प्रत्यक्षाभासः
विवादास्पदम् आकाशम् इति व्यवहर्तव्यम्
शब्दवत्त्वात् इत्यादिकमपि केवलव्यतिरेकि
इति द्रष्टव्यम्।

अथवा

स्वार्थमिति। स्वस्यार्थः प्रयोजनं
यस्मात् तत् स्वार्थमिति समासः। स्वप्रयोजनं च स्वस्यानु-
मेयप्रतिपत्तिः एवं परार्थम्। इत्यस्यापि। अयमिति
व्याप्तिबलेन लीनमर्थं गमयति, इति लिङ्गम्।
तच्च धूमादिः तस्य परामर्शो ज्ञानविशेष इत्यर्थः।
तस्मादिति। लिङ्गपरामर्शादित्यर्थः स्वार्थमुपसंहरति
तद्धेतविति। यस्मादिदं स्वप्रतिपत्तिहेतुः तस्मादेतत् स्वार्थानुमानम्
इत्यर्थः।

XXXXX

P.T.O.